**दिनाङ्क :-07.04.2024**
**प्रात: - 06:55**

**अथ वार्ता:**

**प्रधानमन्त्री/सहारनपुरम्**

प्रधानमन्त्री-नरेन्द्रमोदी प्रोक्तवान् यत् इदं निर्वाचनं केवलं सर्वकारस्य निर्माणार्थं नास्ति अपितु निर्वाचनमिदं विकसित-भारतस्य निर्माणार्थं वर्तते। विगतेषु पञ्चवर्षेषु भारतेन विश्वे पञ्चमार्थव्यवस्थात्वेन आत्मानं स्थापितम्। श्रीमोदिना ह्य: सहारनपुरे भाजपा-दलस्य प्रत्याशिने राघव-लखनपालस्य प्रदीप-चौधरी इत्येतस्य च समर्थने आयोजितायां जनसभायाम् एवम् उक्तम् । अवसरेऽस्मिन् भाजपा-दलस्य वरिष्ठनेता मुख्यमन्त्री योगी-आदित्यनाथ: अपि उपस्थित: आसीत्। आकाशवाण्या: वार्ताहरानुसारं श्रीमोदिना कथितं यत् यदि उद्देश्या: समीचीना: चेत् परिणामा: अपि समीचीना: भवन्ति । तेनोदीरितं यत् भाजपा-सर्वकार: भेदभावेन विना कार्यं करोति। श्रीमोदिना प्रोदीरितं यत् विगत-दशवर्षेषु सर्वकारेण कृषकाणां विकासार्थं सततं कार्यं कृतमस्ति। योगिना-आदित्यनाथेन कथितं यत् वयं भाग्यशालिन: स्म: यत: अस्माभि: अभिनव-भारतं दृष्टं यत् हि विश्वगुरुत्वेन ज्ञायते।

**राजस्थानम्/प्रधानमन्त्री**

प्रधानमन्त्री वरिष्ठ: भाजपा-नेता नरेन्द्र मोदी अवदत् यत् भाजपा-सर्वकारेण तृतीय-कार्यकालस्य आरम्भानन्तरं शतदिनाभ्यन्तरे एव भ्रष्टाचरणं विरुध्य समुचित-निर्णया: विधास्यन्ते। श्रीमोदी ह्य: राजस्थानस्य पुष्करे एकस्यां नैर्वाचनिक-जनसभायाम् एवमभ्यभाषत। इयं जनसभा अजमेर-पुष्करयो: भाजपा-प्रत्याशिनां समर्थने आयोजिता आसीत्। राज्ये लोकसभा-निर्वाचनार्थं श्रीमोदिन: इयं तृतीया जनसभा अवर्तत।

**राष्ट्रियान्वेषणाभिकरणम्**

राष्ट्रियान्वेषणाभिकरणेन द्वाविंशत्यधिक-द्विसहस्र-तमवर्षस्य-दिसम्बरमासे पश्चिमबंगालस्य भूपतिनगरे घटिते विस्फोटप्रकरणे द्वौ मुख्य-षड्यन्त्रकारिणौ निगडितौ। एतस्मिन् विस्फोटे त्रय: जना: मारिता: आसन्। अनेन अभिकरणेन ह्य: कथितं एतौ आतङ्कवादिनौ राज्यस्य पूर्वीय-मेदिनीपुरजनपदे जनसम्र्मयुतात् क्षेत्रात् गृहीतौ। गृहीतापराधिनो: अभिज्ञानं बलईचरणमैनी-मनोब्रतजना-रूपेण जातम्। उभौ आरोपिणौ आतंकस्य प्रसारे विस्फोनिर्माणकार्ये च संलग्नौ आस्ताम्।

**सिसोदिया/निगडनम्**

दिल्ली-न्यायालयेन मद्यनीति-प्रवञ्चनायां धनशोधन-प्रकरणे आम-आदमी-पार्टीति-दलस्य नेता दिल्ल्या: पूर्वोपमुख्यमन्त्री मनीष-सिसोदिया इत्येतस्य निगडनावधि: अप्रैलमासस्य अष्टादश-दिनांकं यावत् वर्धित:। निगडनावधे: समाप्तौ राउज-एवेन्यू-न्यायालयस्य विशेष-न्यायाधीशेन कावेरी-बावेजा-इत्यनया तस्य निगडनावधि: समेधित:। प्रकरणेऽस्मिन् सहारोपी आप-नेता संजय-सिंह: अपि कार्याचरणावधौ न्यायालये उपस्थित: आसीत्। अस्मिन् प्रकरणे संजय-सिंह: सद्य: एव सर्वोच्चन्यायालयेन विमोचित:। राष्ट्रियान्वेषणाभिकरणेन प्रवर्तन-निदेशालयेन च आम-आदमी-पार्टीति-दलस्य एते नेतार: मद्यनीति-प्रवञ्चनायां अनियमितताताम् उद्दिश्य आरोपिता: ।

**संस्कृत-साप्ताहिकी**

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै:क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: अद्य मध्याह्ने विंशति-निमेषाधिकैक-वादनत: भविष्यति। कृपया श्रृण्वन्तु।

**क्रिकेट्**

आई.पी.एल्.-क्रिकेट्-स्पर्धा-मालिकायां गतरात्रौ जयपुरे सवाई-मानसिंह-क्रीडाङ्गणे आयोजिते द्वन्द्वे राजस्थान-रॉयल्स्-दलेन रॉयल्-चैलेन्जर्स-बेंगलूरु-दलं षड्भिः क्रीडकैः पराजितम्। अद्यतने द्वन्द्वद्वये प्रथमं मुम्बय्यां वानखेडे-क्रीडाङ्गणे अपराह्णे सार्ध-त्रिवादने मुम्बई-इंडियन्स्-डेल्ही-कैपिटल्स्-दलयोः स्पर्धा भविष्यति। ततः सायं सार्ध-सप्तवादनात् लखनऊ-नगरे लखनऊ-सुपर-जॉइंट्स-गुजरात-टाइटंस्-दले स्पर्धिष्यतः।

**।। इति वार्ता: ।।**